# 4. चतुर्थः पाठः
## सज्जनौ रामसौमौ

एतौ / तौ

एषः रामः । एतस्य सहोदरः सोमः । एतौ सर्वदा सहैव भवतः । प्रतिदिनं प्रातः सहैव विद्यालयं गच्छतः । तत्र पाठं सहैव पठतः । सायं सहैव विद्यालयतः प्रत्यागच्छतः ।

एकदा तौ मार्गे एकं धनस्यूतं प्राप्नुतः । तम् आरक्षकालयं नयतः । तयोः व्यवहारेण आरक्षकाधिकारी सन्तुष्टः । "एतौ सज्जनौ स्तः । परधनं न इच्छतः । अतः एतयोः कृते पारितोषिकं ददामि" इति वदति ।

किन्तु तौ 'पारितोषिकं मास्तु' इति वदतः । गृहं प्रत्यागच्छतः । जननी जनकः च तयोः प्रशंसां कुरुतः ।

ध्यानेन पठन्तु -

| एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|
| छात्रः | छात्रौ | छात्राः | गच्छति | गच्छतः | गच्छन्ति |
| एषः | एतौ | एते | क्रीडति | क्रीडतः | क्रीडन्ति |
| एषा | एते | एताः | पठति | पठतः | पठन्ति |
| कः | कौ | के | लिखति | लिखतः | लिखन्ति |
| का | के | काः | हसति | हसतः | हसन्ति |